.. sa.nkaTAstutiH ..

# ॥ संकटास्तुतिः ॥

सदावृन्दारकोद्वृन्दाऽऽनन्द-सन्दोह दायकम् ।
अमन्दमंगलागारं वन्दे शंकरनन्दनम् ॥ १॥
किं कार्यं कठिनं कुतः परिभवः कुत्रापवादाद् भयं
किं मित्रं न हि किन्नु राजसदनं गम्य न विद्या च का ।
किं वाऽन्यज्जगतीतले प्रवद यत्तेषामसम्भावितं
येषां हृत्कमले सदा वसति सा तोषप्रदा संकटा ॥२।
अयि गिरिनन्दिनि नन्दितमेदिनि विश्वविनोदिनि नन्दिनुते
गिरिवरविन्ध्य-शिरोऽधि-निवासिनि विष्णुविलासिनि जिष्णुनुते ।
भगवति हे शितिकण्ठ-कुटुम्बिनि भूरिकुटुम्बिनि भूतिकृते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ १॥
सुरवरवर्षिणि दुर्धरधर्षिणि दुर्मुख-मर्षिणि हर्षरते
त्रिभुवनपोषिणि शंकरतोषिणि कल्मषमोषिणि घोषरते ।
मदनुजनिरोषिणि दुर्मदशोषिणि दुर्मुनिरोषिणि सिन्धुसुते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ २॥
अवि जगदम्ब कदम्बवन-प्रियवासिनि तोषिणि क़क़हाक़रतेक़क़
शिखरि-शिरोमणि-तुंगहिमालय-शृंगनिजालय-क़क़क़क़।
मधुमधुरे मधु-कैटभ-गंजिनि महिषविदारिणि क़क़क़राक़रते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ ३॥
अयि निजहुंकृति-मात्रनिराकृत-धम्रविलोचन-धूम्रशते
समरविशोषित-रोषित-शोणित-बीजसमुद्भव-बीजलते ।
शिव-शिव-शुम्भ-निशुम्भ महाहव-तर्पित-भूत-पिशाचरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ ४॥
अयि शतखण्ड-विखण्डित-रूण्ड-वितुण्डित-शुण्ड-गजाधिपते
निजभुजदण्ड-निपातितचण्ड-विपाटितमुण्ड भटाधिपते ।
रिपुगजगण्ड-विदारण-चण्डपराक्रम-शौण्डमृगाधिपते
जय जय हे महिषासुर-मर्दिनि रम्यकपर्दिनि शैलसुते ॥ ५॥
धनुरनुवंग-रणक्षणसंग-परिस्फुरदंग-नटत्कटके
कनक-पिशंग-पृषत्कनिषंग-रसद्भटशृंग-हतावटुके ।
हतचतुरंगबल-क्षितिरंग-घटद्-बहुरंग-रटद्-बटुके
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ ६॥
अयि रणदुर्मद-शत्रुबधाद्धुर-दुर्धर-निर्भर-शक्तिभृते
चतुर-विचार-धुरीण-महाशयदूतकृत-प्रमथाधिपते ।

दुरित-दुरीह-दुराशय-दुर्मति-दानवदूत-दुरन्तगते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ ७ ॥
अयि शरणागत-वैरिवधूजन-वीरवराभय-दायिकरे
त्रिभुवनमस्तक-शूलविरोधि-शिरोधिकृतामल-शूलकरे ।
दुमिदुमितामर-दुन्दुभिनाद-मुहुर्मुखरीकृत-दिंगनिकरे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ ८ ॥
सुरललना-ततथेयित-थेयित-थाभिनयोत्तर-नृत्यरते
कृतकुकुथा-कुकुथोदि-दडाडिक-तालकुतूहल-गानरते ।
धुधुकुट-धूधुटधिन्धि-मितध्वनि-धीरमृदंग-निनादरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ ९ ॥
जय जय जाप्यजये जयशब्द-परस्तुति-तत्पर-विश्वनुते
झणक्षण-झिंझिम-झिंकृत-नूपुर-शिंचित-मोहित-भूतपते ।
नटितनटार्ध-नटीनटनायक-नाटन-नाटित-नाट्यरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ १० ॥
अयि सुमनः-सुमनः-सुमनः-सुमनः-सुमनोरमकान्तियुते
श्रितरजनी-रजनी-रजनीरजनीकर-वक्त्रभृते ।
सुनयन-विभ्रमर-भ्रमर-भ्रमर-भ्रमर भ्रमराभिदृते
जय जये हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ ११ ॥
महित-महाहव मल्लमतल्लिक-वल्लित-रल्लित-भल्लिरते
विरचितवल्लि-कपालिक-पल्लिक-झिल्लिक-भिल्लिकवर्गवृते ।
श्रुतकृतफुल्ल-समुल्लसितारूण-तल्लज-पल्लव-सल्ललिते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ १२ ॥
अयि सुवतीजन-लालस-मानस-मोहन-मन्थरराजसुते
अविरल-गण्डगलन्-मदमेदुर-मत-मतंगजराजगते ।
त्रिभुवन-भूषण-भूत-कलानिधिरूप-पयोनिधिराजसुते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ १३ ॥
कमलदलामल-कोमलकान्ति-कलाकलितामल-भालतले
सकल विलास-कलानिलय-क्रमकेलिचलत्-कलहंसकुले ।
अलिकुलसंकुल-कुन्तलमण्डल-मौलिमिलद्-बकुलालिकुले
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ १४ ॥
करमुरलीरव-वर्जित-कूजित-लज्जित-कोकिल-मंजुमते
मिलित-मिलिन्द-मनोहरगुंजित-रंजित-शैलनिकुंजगते ।
निजगण-भूतमहाशबरीगण-रंगणसम्भृत-केलिरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ १५ ॥
कटितटपीत-दुकूलविचित्र मयूखतिरस्कृत चण्डरूचे
जितकनकाचल-मौलिमदोर्जित-गर्जितकुंजर-कुम्भकुचे ।

प्रणतसुराऽसुर-मौलिमणि-स्फुरदंशुलसन्नखचन्द्ररूचे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ १६ ॥
विजित-सहस्रकरैक-सहस्रकरैक-सहस्रकरैकनुते
कृतसुरतारक-संगरतारक-संगरतारक-सूनुनुते ।
सुरथसमाधि-समानसमाधि-समानसमाधि-सुजाप्यरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ १७ ॥
पदकमलं करूणानिलये वरिवस्यति योऽनुदिनं सुशिवे
अयि कमले कमलानिलये कमलानिलयः स कथं न भवेत् ।
तव पदमेव परं पदमस्त्विवति शीलयतो मम किं न शिवे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ १८ ॥
कनकलसत्-कलशीकजलैरनुषिंचति तेऽंगणरंगभुवम्
भजति स किं न शचीकुचकुम्भ-नटीपरिरम्भ-सुखानुभवम् ।
तव चरणं शरणं करवाणि सुवाणि पथं मम देहि शिवम्
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ १९ ॥
तव विमलेन्दुकलं वदनेन्दुमलं कलयन्ननुकूलयते
किमु पुरूहूत-पुरीन्दुमुखी-सुमुखीभिरसौ विमुखीक्रियते ।
मम तु मतं शिवमानधने भवती कृपया किमु न क्रियते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ २० ॥
अयि मयि दीनदयालुतया कृपयैव त्वया भवितव्यमुमे
अयि जगतो जननीति यथाऽसि मयाऽसि तथाऽनुमतासि रमे ।
यदुचितमत्र भवत्पुरगं कुरू शाम्भवि देवि दयां कुरू मे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ २१ ॥
स्तुतिमिमां स्तिमितः सुसमाधिना नियमतो यमतोऽनुदिनं पठेत् ।
परमया रमया स निषेव्यते परिजनोऽरिजनोऽपि च तं भजेत् ॥ २२ ॥
॥ इति संकटा स्तुतिः समाप्ता ॥

Visit http://www.webdunia.com for additional texts with Hindi meanings.

---

Please send corrections to sanskrit@cheerful.com
Last updated November 22, 2001